# श्रीरामाष्टोत्तरशतनामस्तोत्रम् ३

shrIrAmAShTottarashatanAmastotram 3

sanskritdocuments.org

May 12, 2018

# shrIrAmAShTottarashatanAmastotram 3

# श्रीरामाष्टोत्तरशतनामस्तोत्रम् ३

## Sanskrit Document Information

Text title : rAmAShTottarashatanAmastotram 3

File name : rAmAShTottarashatanAmastotram3.itx

Category : raama, aShTottarashatanAma

Location : doc_raama

Author : Dinakar Ghaisas Guruji

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 12, 2018

*sanskritdocuments.org*

# श्रीरामाष्टोत्तरशतनामस्तोत्रम् ३

श्रीगणेशाय नमः ॥

वाल्मीकिरुवाच ।
यैस्तु नामसहस्रस्य पतनं न भवेत्सदा ।
रचितं नित्यपाठाय तेभ्यः स्वल्पाक्षरं मया ॥ १॥

अष्टोत्तरशतं नाम्नामादरेण पठन्तु ते ।
रामपादारविन्दश्रीप्राप्तिं तेषां च प्रार्थये ॥ २॥

गुणानां चिन्तनं नित्यं दुर्गुणानां विवर्जनम् ।
साधकानां सदा वृत्तिः परमार्थपरा भवेत् ॥ ३॥

यथा तु व्यसने प्राप्ते राघवः स्थिरनिश्चयः ।
विजयं प्राप्तवानन्ते प्राप्नुवन्तु च सज्जनाः ॥ ४॥

श्रीगणेशाय नमः ।
सम्राड्दक्षिणमार्गस्थः सहोदरपरीवृतः ।
साधुकल्पतरुर्वश्यो वसन्तऋतुसम्भवः ॥ ५॥

सुमन्त्रादरसम्पूज्यो यौवराज्यविनिर्गतः ।
सुबन्धुः सुमहन्मार्गी मृगयाखेलकोविदः ॥ ६॥

सरित्तीरनिवासस्थो मारीचमृगमार्गणः ।
सदोत्साही चिरस्थायी स्पष्टभाषणशोभनः ॥ ७॥

स्त्रीशीलसंशयोद्विग्नो जातवेद प्रकीर्तितः ।
स्वयम्बोधस्तमोहारी पुण्यपादोऽरिदारुणः ॥ ८॥

साधुपक्षपरो लीनः शोकलोहितलोचनः ।
संसारवनदावाग्निः सहकार्यसमुत्सुकः ॥ ९॥

सेनाव्यूहप्रवीणः स्त्रीलाञ्छनकृतसङ्गरः ।

सत्याग्रही वनग्राही करग्राही शुभाकृतिः ॥ १० ॥

सुग्रीवाभिमतो मान्यो मन्युनिर्ज्जितसागरः ।
सुतद्वययुतः सीताश्वार्भगमनाकुलः ॥ ११ ॥

सुप्रमाणितसर्वाङ्गः पुष्पमालासुशोभितः ।
सुगतः सानुजो योद्धा दिव्यवस्त्रादिशोभनः ॥ १२ ॥

समाधाता समाकारः समाहारः समन्वयः ।
समयोगी समुत्कर्षः समभावः समुद्यतः ॥ १३ ॥

समदृष्टिः समारम्भः समवृत्तिः समद्युतिः ।
सदोदितो नवोन्मेषः सदसद्वाचकः पुमान् ॥ १४ ॥

हरिणाकृष्टवैदेहीप्रेरितः प्रियदर्शनः ।
हृतदार उदारश्रीर्जनशोकविशोषणः ॥ १५ ॥

हनुमद्वाहनोऽगम्यः सुगमः सज्जनप्रियः ।
हनुमद्दूतसपन्नो मृगाकृष्टः सुखोदधिः ॥ १६ ॥

हृन्मन्दिरस्थचिन्मूर्तिर्मृदू राजीवलोचनः ।
क्षत्राग्रणीस्तमालाभो रुदनक्लिन्नलोचनः ॥ १७ ॥

क्षीणायुर्जनकाहूतो रक्षोघ्नो ऋक्षवत्सलः ।
ज्ञानचक्षुर्योगविज्ञो युक्तिज्ञो युगभूषणः ॥ १८ ॥

सीताकान्तश्चित्रमूर्तिः कैकेयीसुतबान्धवः ।
पौरप्रियः पूर्णकर्मा पुण्यकर्मपयोनिधिः ॥ १९ ॥

सुराज्यस्थापकश्चातुर्वर्ण्यसंयोजकः क्षमः ।
द्वापरस्थो महानात्मा सुप्रतिष्ठो युगन्धरः ॥ २० ॥

पुण्यप्रणतसन्तोषः शुद्धः पतितपावनः ।
पूर्णोऽपूर्णोऽनुजप्राणः प्राप्यो निजहृदि स्वयम् ॥ २१ ॥

वैदेहीप्राणनिलयः शरणणतवत्सलः ।
शुभेच्छापुर्वकं स्तोत्रं पठनीयं दिने दिने ।
अष्टोत्तरशतं नाम्नां राघवस्य पठेन्नरः ॥ २२ ॥

इष्टं लब्ध्वा सदा शान्तः सामर्थ्यसहितो भवेत् ।
नित्यं रामेण सहितो निवासस्तस्य वा भवेत् ॥ २३ ॥

इति श्री अनन्तसुतश्रीदिवाकरविरचितं
श्रीरामाष्टोत्तरशतनामस्तोत्रं ३ सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIrAmAShTottarashatanAmastotram 3*

pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*